विचेष्टितमिदं नेष्टं स्मृतं वाजिनाम्। आरोहणमन्यवाजिनां पर्य्याणादियुतस्य वाजिनः। उपवाह्यतुरङ्गमस्य वा ऽविकलस्यैव विपन्न शोभना। क्रौञ्चवद्रिपुवधाय हेषितं ग्रीवया त्वचलया च सोन्मुखम्। स्निग्धमुच्चमनुनादि हृष्टवद्ग्रासरुद्धवदनैश्च वाजिभिः। पूर्णपात्रदधिविप्रदेवता गन्धपुष्पफलकाञ्चनादि वा। द्रव्यमिष्टमथ वापरं भवेद्धेषतां यदि समीपतो जयः। भक्ष्यपानसलिलाभिनन्दिनः पत्युरौपयिकनन्दिनोऽथ वा। सव्यपार्श्वगतदृष्टयोऽथवा वाञ्छितार्थफलदास्तुरङ्गमाः। वामैश्च पादैरभिताड़यन्तो महीं प्रवासाय भवन्ति भर्त्तुः। सन्ध्यासु दीप्तामवलोकयन्तो हेषन्ति चेद्बन्धपराजयाय। अतीव हेषन्ति किरन्ति बालान् निद्रारताश्च प्रवदन्ति यात्राम्। रोमत्यजो दीनखरस्वराश्च पांशून् ग्रसन्तश्च भयाय दृष्टाः। समुन्नवद्दक्षिणपार्श्वशायिनः पदं समुत्क्षिप्य च दक्षिणं स्थिताः। जयाय शेषेष्वपि वाहनेष्विदं फलं यथासम्भवमादिशेद्बुधः। आरोहति क्षितिपतौ विनयोपपन्नो यात्रानुगोऽन्यतुरगं प्रति हेषते च। वक्त्रेण वा स्पृशति दक्षिणमात्मपार्श्वं योऽश्वः स भर्त्तुरचिरात् प्रचिनोति लक्ष्मीम्। मुहुर्मुहुर्मूत्रशकृत् करोति न ताड्यमानोऽप्यनुलोमयायी। अकार्य्यभीतोऽस्रुविलोचनश्च शुभं न भर्त्तुस्तुरगोऽभिधत्ते"।

**अश्वतर** पु० तनुरश्वः अश्व+तनुत्वे ष्टरच्। अश्वायामश्वेनोत्पन्नत्वेऽश्वत्वं तस्य तनुत्वञ्चान्यपितृकत्वे। १गर्द्दभेनाश्वायामुत्पन्ने १खचरेऽश्वविशेषे" २सर्पभेदे च। जातित्वेन स्त्रियामुभयत्र ङीप्। "जानश्रुतिः पौत्रायणः षट् शतानि गवां निष्कमश्वतरीरथः" इति छा०उ०। दण्डेनोपपनतं शत्रुमनुगृह्णाति योनरः। स मृत्युमुपगृह्णीयाद्गर्भमश्वतरी यथा"मनुः। "बहुत्वान्नामधेयानि पन्नगानां तपोधन! न कीर्त्तयिष्ये सर्वेषां प्राधान्येन तु मे शृणु। शेषः प्रथमतोजातो वासुकिस्तदनन्तरम्"इत्युपक्रम्य"कम्बलाश्वतरौ चापि नागःकालीयकस्तथा" भा०आ०प०। अयञ्च वरुणलोकेस्थितः" भा०स०प० वरुणसभावर्णने "कम्बलाश्वतरौ नागौ धृतराष्ट्रबलाहकौ" ३गन्धर्वभेदे। "तद्यथैवादोधावयतोऽश्वो वा अश्वतरो वा गदायेत" शत०ब्रा०।

**अश्वत्थ** पु० न श्वश्चिरं शाल्मलिवृक्षादिवत् तिष्ठति स्था—क पृ०नि०। १स्वनामख्याते वृक्षे, "बोधिद्रुः पिप्पलोऽश्वत्थश्चलपत्रोगजाशनः। पिप्पलो दुर्जरःशीतः पित्तश्लेष्मव्रणास्रजित्। गुरुस्तुवरकोरूक्षोवर्ण्योयोनिविशोधनः" भा०प्र०। "अश्वत्थः सर्ववृक्षाणाम् गीता" तस्य विष्णुरूपित्वेन सर्व्वामङ्गलनाशकत्वम् अश्वत्थोत्पत्तिः "पार्वतीशिवयोर्देवैः सुरतं कुर्वतोः किल। अग्निं ब्राह्मणवेशेन प्रेष्य विघ्नं कृतं पुरा। शशाप पार्वती क्रुद्धा सर्वानेव दिवौकसः" इत्युपक्रम्य "तस्मान्मम सुखभ्रंशात् यूयं वृक्षत्वमाप्स्यथ" पार्वतीशापमुक्त्वा "तस्माद्वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः। तस्मादिमौ विष्णुमहेश्वरावुभौ बभूवतुर्बोधिवटौ मुनीश्वराः!"। बोधिस्त्वयं चार्किदिनं विनैव त्वस्पृश्यतामापदलक्ष्मीयोगात्" पद्मपु० क्रिया० १६० अध्या०उक्ता। "तस्य शनिवारमात्रे स्पृश्यताकारणमप्युक्तं तत्रैव १६१ अध्या०। लक्ष्म्या ज्येष्ठभगिन्या अलक्ष्म्या सह उद्दालकस्य विवाहमुक्त्वा पत्या "यावदागमनं मम तावत् अश्वत्थमूले त्वं निषीद"इत्युक्तया अलक्ष्म्या तत्रैव स्थितया बहुतिथे काले गतेऽपि पत्युरागमनमनालोक्य क्रन्दितं, तच्छ्रुत्वा च लक्ष्म्या कनिष्ठभगिन्या नोदितो विष्णुस्तत्रागत्य तामुवाच यथा। "लक्ष्म्या सह ततो विष्णुस्तत्रागात् कृपयान्वितः। आश्वासयन्नलक्ष्मीं तामिदं वाक्यमथाब्रवीत्। अश्वत्थवृक्षमासाद्य सदाऽलक्ष्मीः स्थिरा भव। ममांशसम्भवोह्येष आवासस्ते मया कृतः। मन्दवारे सदा ह्येनं लक्ष्मीरत्रागमिष्यति। अस्पृश्योऽसौ भवेत्तस्मान्मन्दवारं विना किल" एवञ्च अलक्ष्म्याः सर्वदावासादन्यदिने तस्यास्पृश्यत्वं मन्दवारे लक्ष्मीसमागमाच्च स्पृश्यत्वमिति मर्य्यादा कृता। "अश्वत्थरूपो भगवान् विष्णुरेव न संशयः। रुद्ररूपो वटस्तद्वत् पलाशो ब्रह्मरूपधृक्। दर्शनस्पर्शनादेव ते वै पापहराः स्मृताः" तत्रैवोक्तम् अश्वत्थस्पर्शस्तु शनिवारे एव प्रागुक्तवचनात्। तस्य वैशाखे सेचनफलं पद्मपु० क्रिया० ११अध्या०। यथा "वैशाखे सेचयेन्नित्यं विष्णुमश्वत्थरूपिणम्। चतुर्वर्गफलावाप्तिहेतवे वैष्णवोजनः। गण्डूषमात्रतोयेन कुर्य्याद्योऽश्वत्थसेचनम्। सोऽपि याति परं स्थानं विमुक्तः पापकोटिभिः" तन्मूलबन्धफलम् तत्रैव "अश्वत्थमूलं विप्रर्षे! यो बध्नाति शिलादिभिः। अश्वत्थरूपी भगवान् किं तस्मै न हि यच्छति"। तत् प्रणामफलं तत्रैव। "अश्वत्थद्रुममालोक्य प्रणामं कुरुते तु यः। आयुर्वृद्धिर्भवेत्तस्य वर्द्धन्ते सर्वसम्पदः"। अतएव दुःस्वप्नदर्शनादौ "अश्वत्थरूपी भगवान् दुःस्वप्नं शमयाशु मे" इति मन्त्रेण प्रणामोविहितः। "तन्मूले धर्म्मकर्म्माचरणप्रशंसा तत्रैव। "यदाश्वत्थतले विप्र! धर्मकर्म विधी-